अशक्यकरणायोद्यमरूपायां, १ शक्त्युत्कर्षमाविष्कर्त्तुमत्युक्तिरूपायाञ्च सम्भावनायां, २ सन्देहे, ३ निन्दायां, ४ प्रश्ने, ५ समुच्चये, ६ अल्पपदार्थे, ७ कामचारानुज्ञायाम्, ८ अवधारणे, ९ पुनरर्थे च। क्रियायोगेऽस्य उपसर्गसंज्ञा "अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु इति" पा० उक्तार्थेषु कर्म्मप्रवचनीयसंज्ञा तदर्थेषु न तु उपसर्गत्वम् तेन न षत्वादि तत्र "पदार्थे सर्पिषोऽपि स्यात्। अनुपसर्गत्वान्न षः। सम्भावनायां लिङ् तस्या एव विषयभूते भवने कर्त्तृदौर्लभ्यप्रयुक्तन्दौर्लभ्यं द्योतयन्नपिशब्दः स्यादित्यनेन सम्बध्यते सर्पिष इति षष्ठी तु अपिशब्दबलेन गम्यमानस्य विन्दोरवयवावयविभावसम्बन्धे। इयमेवापिशब्दस्य पदार्थद्योतकता नाम। द्वितीया तु नेह प्रवर्त्तते सर्पिषो विन्दुना योगो न त्वपिनेत्युक्तत्वात्" सि०कौ० सम्भावने अपि स्तुयाद्विष्णुम् सम्भावनं शक्त्युत्कर्षमाविष्कर्त्तुमत्युक्तिः। अन्ववसर्गः कामचारानुज्ञा अपि स्तुहि। गर्हायाम् धिग्देवदत्तमपि स्तुयाद्वृषलम्। समुच्चये अपि सिञ्च अपि स्तुहि। गणरत्ने तु "सम्भवगर्हाशीर्म्मृतिभूषासमुच्चयेष्वित्युक्तं तेन तेऽपि अपिशब्दार्थाः तत्र १० सम्भवे योजनमस्ति, गर्हायाम् अपि पापिन्! ११ आशीर्वादे भद्रमपि, १२ मृतौ मरणमपि, १३ भूषायाम् अपि नह्यति हारम्, समुच्चये तदपीत्युदाहृतञ्च। समुच्चये "अप्यप्रसिद्धं यशसे हि पुंसामिति" कुमा०। प्रश्ने "अपि प्रसन्नेन महर्षिणा त्वमिति" रघुः अस्य क्रियायोगभेदे अकारलोपो वा "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयो" रित्युक्तेः। अपिधानं पिधानं अपिनद्धः पिनद्ध इति "वितत्य शार्ङ्गं कवचं पिनह्येति" भट्टिः।

**अपिकक्ष** अव्य० कक्षे विभक्त्यर्थे अव्ययी०। १ कक्षप्रदेशे इत्यर्थे "ग्रीवायां बद्धो अपिकक्ष आसनि" ऋ० ४,४०,४।

**अपिकक्ष्य** त्रि० अपिकक्षं सन्धानम् यत्। १ कक्षप्रदेशेन संधानभूते प्रवर्ग्यविद्यारूपे रहस्ये। "त्वाष्ट्रं यद्दस्रावपिकक्ष्यं वाम्" ऋ० १,११७'२२। "अपिकक्ष्यं छिन्नस्य यज्ञशिरसः कक्षप्रदेशेन संधानभूतं प्रवर्ग्यविद्याख्यं रहस्यमिति" भा०।

**अपिकर्ण** न०अपिगतः कर्णम् अत्या०स०। १ समीपे। २ तद्वर्त्तिनि त्रि०। "नु ते अपिकर्णे आघृणे ऋ० ६,४८,१६, "अपिकर्णे कर्णसमीपगते समीपे स्थितः इति भा०।

**अपिगीर्ण** त्रि० अपि+गॄ—क्त। १ कथिते २ वर्णिते ३ स्तुते च। [१ प्रतिग्राह्ये।

**अपिगृ(ग्रा)ह्य** त्रि० अपि+ग्रह—वेदे—क्यप् लोके ण्यत्।

**अपिच** अव्य० द्व०। १ किञ्चेत्यर्थे पदद्वयमिति बहवः।

**अपिच्छिल** त्रि० न०त०। १ पिच्छिलविरोधिनि गाढ़े २ अपङ्किले च। "प्रमेहिणो यदा मूत्रमनाविलमपिच्छिलमिति" निदा०।

**अपिज** त्रि० अपि अप्सु जायते जन—ड अलुक्समा० वेदे अप्शब्दस्यैकत्वम्। १ज्यैष्ठे मासि तस्य जलक्रीड़ारतिसाधनत्वात्तथात्वम्। "प्रसवाय स्वाहापिजाय स्वाहेति" यजु० १८,२८। "अप्सु जायते इत्यपिजः जलक्रीड़ारतत्वाज्ज्यैष्ठ इति" वेददीपः।

**अपित्** स्त्री आप इतोगता यस्याः वेदे न जश्। १जलरहितायां नद्याम् "अपितः पिन्वतं धिय" ऋ० ७,८२,३ "अपितो-जलरहिता नदीरिति" भा० "अस्य मदे जरितमिन्द्रोजिन्वदजुवोऽपिन्वदपित" इति तद्धृता श्रुतिः।

**अपितु** अव्य० अपि+तु+द्व०। १ यद्यर्थे त्रिका०। २ किन्तु इत्यर्थे भूरिप्रयोगः।

**अपित्व** न० अपित्वरतेऽस्मै अपि+त्वर—बा० ड। १ भागे भागिनो हि विभक्तधनाद्यादानाय त्वरन्ते इति तस्य तथात्वम्। "तस्यामपित्वमीषा ते" इति शत०ब्रा०।

**अपित्विन्** त्रि० अपित्वं भागोऽस्यास्ति इनि स्त्रियां ङीप्। १ भागवति सभागे। "तस्मिन् देवता अपित्विन्योमन्यन्ते" इति शत०ब्रा०।

**अपिधान** न० अपि+ धा—ल्युट्। १ आच्छादने। करणे ल्युट्। २ तत्साधने त्रि०। "अमृतापिधानमसि स्वाहेति" भोजनान्त जलपानमन्त्रः "राध्यमानस्यौदनस्य द्यौरपिधानमिति" अथ० ११,३,१। साधने आच्छादनत्वोपचारात् सामानाधिकरण्यम्। अपेरतो वा लोपे पिधानमप्यत्र "पृथिवी ते पात्रं द्यौः पिधानमिति" श्राद्धमन्त्रः "तस्य तद्द्वारं यदमावास्या चन्द्रमा एवद्वारपिधानः" शत०ब्रा०।

**अपिधि** पु० अपिधीयते तृप्तिपर्य्यन्तं दीयते अपि+धा—कि। १ तृप्तिपर्य्यन्तदत्ते। "प्रियाँ अपिधी वनिषीष्ट" ऋ० १,१२७,७, "अपधीन् तृप्तिपर्य्यन्तं दत्तानिति" भा०।

**अपिनद्ध** त्रि० अपि+नह—क्त। १ परिहिते, अतोवालोपे पिनद्धश्च तत्रार्थे।

**अपिप्राण** त्रि० अपि+प्र+अन—अच् स्त्रियां गौ० ङीष्। १सर्व्वदा चेष्टमाने "यजत्रा अपिप्राणी च सदनी च भूया" इति ऋ०। १,१८६,११। "अपिप्राणी सर्व्वदा चेष्टयित्रीति" भा०।

**अपिव्रत** त्रि० अपिः संसर्गे संसृष्टं व्रतं, कर्म्म, भोजनं वा यस्य।